# राष्ट्रियसंस्कृतविद्यापीठस्य
## संस्कृतभारत्याः संयुक्ताध्वर्यवे
# संस्कृतसप्ताहाचरणम्

## विद्यापीठच्छात्राणां स्पर्धाः

- **प्राक्-शास्त्रिच्छात्राणां स्पर्धाः-**
  1. शब्दकण्ठपाठः- युष्मद्, अस्मद्, मति, नदी, राजन्, वारि, नृ, धूमपा, वाच्, चन्द्रमस्।
  2. धातुकण्ठपाठः- भू, दा, पा, लभ, गम्, कम्प, वन्द, अस्, कृ, कथ (लट्, लृट्, लोट्, लङ्, विधिलिङ्)
  3. श्लोककण्ठपाठः- रघुवंशस्य द्वितीयसर्गस्य प्रारम्भात् विंशतिः श्लोकाः।

नियमाः-1. शब्दकण्ठपाठे सर्वाणि अपि रूपाणि वक्तव्यानि। निर्णायकः कमपि शब्दं प्रष्टुं शक्नोति।
2. धातुकण्ठपाठे सर्वाणि अपि रूपाणि वक्तव्यानि। निर्णायकः कमपि धातुं प्रष्टुं शक्नोति।
3. श्लोककण्ठपाठे स्पष्टम् उच्चारणं भवेत्। श्लोकोच्चारणं रागयुक्तं भवेत्। निर्णायकः कस्माच्चित् श्लोकात् प्रष्टुं शक्नोति।

- **शास्त्रिच्छात्राणां स्पर्धाः-**
  1. आशुभाषणस्पर्धा
  2. भाषणस्पर्धा- **संस्कृते विज्ञानम्**
  3. आदित्यहृदयस्तोत्रम्

नियमाः-1. विषयाः स्पर्धास्थले एव दास्यन्ते। भाषणसमयः 4+1=5 निमेषात्मकः वर्तते।
2. भाषणसमयः 4+1=5 निमेषात्मकः वर्तते। भाषणे विषयस्पष्टता भवेत्।
3. श्लोककण्ठपाठे स्पष्टम् उच्चारणं भवेत्। श्लोकोच्चारणं रागयुक्तं भवेत्। निर्णायकः कस्माच्चित् श्लोकात् प्रष्टुं शक्नोति।

- **आचार्यच्छात्राणां स्पर्धाः**
  1. वादविवादस्पर्धा

  **संस्कृतनिमित्तं योगः वा ? आहोस्वित् योगनिमित्तं संस्कृतं वा ?**

नियमाः-

1. स्पर्धालूनां कृते विषयस्य उपस्थापनार्थं निमेषत्रयं दीयते। पुनः अन्यस्य मतं खण्डयितुं निमेषद्वयं दीयते, उपसंहर्तुं निमेषद्वयं दीयते। त्रयाणाम् उत्तमवादविवादकानां कृते पुरस्काराः दास्यन्ते।

चन्द्रकान्त रङ्गनाथ भट्टः
संयोजकः

- **शिक्षाशास्त्रिच्छात्राणां शिक्षाचार्यच्छात्राणां स्पर्धा:**

1. आशुभाषणस्पर्धा।
2. संस्कृतगीतगानस्पर्धा(वैयक्तिकम्)

नियमा:-

1. विषया: स्पर्धास्थले एव दास्यन्ते। भाषणसमय: 4+1=5 निमेषात्मक: वर्तते।
2. गीतगानस्पर्धायां गीतं गति-यति-ताल-लयसहितं स्यात्, गीतं संस्कृतगीतमेव स्यात्। अन्यभाषात: अनुदितगीतं नानुमन्यते।

- **सर्वेषां छात्राणां स्पर्धा:-**

1. शास्त्रार्थस्पर्धा (स्वशास्त्रम् अधिकृत्य 10 निमेषान् यावत् भाषणम्)
2. भगवद्गीताया: पञ्चदशाध्यायस्य श्लोककण्ठस्थीकरणम्।

नियमा:-

1. पारम्परिकपद्धत्यनुसारं शास्त्रार्थस्पर्धा भवेत्। समय: 8+2=10 निमेषात्मक: वर्तते। अत्र पुरस्कारत्रयमेव दीयते।
2. गीताकण्ठस्तीकरणस्पर्धायां स्पष्टोच्चारणं भवेत् पुनश्च रागयुक्तं च भवेत्।

सूचना:-

1. 06.08.217 तमे दिनाङ्के सर्वा: स्पर्धा: रमारञ्जनमुखार्जीसभाङ्गणे नववादनत: आरप्स्यन्ते।
2. ये भागं ग्रहीतुम् इच्छन्ति ते **श्रीकिरणभट्टेन** सह सम्पर्कं कुर्यु:(9481267438)।
3. स्पर्धायां प्रथमद्वितीयतृतीयस्थानानि प्राप्तवद्भ्य: उत्तमपुरस्कारा: दास्यन्ते।

पकीर्ति रघुनाथभट्ट:
संयोजक: